# Agastya Gita

# અગસ્ત્યગીતા

## Document Information

Text title : agastyagItA varAhapurANe

File name : agastyagItA.itx

Category : gItA, giitaa

Location : doc_giitaa

Proofread by : PSA Easwaran

Description-comments : Varahapurana adhyAya 51-67. There are quite a few variations in printed books.

Latest update : June 26, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 26, 2022

*sanskritdocuments.org*

# અગસ્ત્યગીતા

## એકપઞ્ચાશોઽધ્યાયઃ

શ્રીવરાહ ઉવાચ ।
શ્રુત્વા દુર્વાસસો વાક્યં ધરણીવ્રતમુત્તમમ્ ।
યયૌ સત્યતપાઃ સદ્યો હિમવત્પાર્શ્વમુત્તમમ્ ॥ ૫૧.૧॥

પુષ્પભદ્રા નદી યત્ર શિલા ચિત્રશિલા તથા ।
વટો ભદ્રવટો યત્ર તત્ર તસ્યાશ્રમો બભૌ ।
તત્રોપરિ મહત્ તસ્ય ચરિતં સમ્ભવિષ્યતિ ॥ ૫૧.૨॥

ધરણ્યુવાચ ।
બહુકલ્પસહસ્રાણિ વ્રતસ્યાસ્ય સનાતન ।
મયા કૃતસ્ય તપસસ્તન્મયા વિસ્મૃતં પ્રભો ॥ ૫૧.૩॥

ઇદાનીં ત્વત્પ્રસાદેન સ્મરણં પ્રાક્તનં મમ ।
જાતં જાતિસ્મરા ચાસ્મિ વિશોકા પરમેશ્વર ॥ ૫૧.૪॥

યદિ નામ પરં દેવ કૌતુકં હૃદિ વર્તતે ।
અગસ્ત્યઃ પુનરાગત્ય ભદ્રાશ્વસ્ય નિવેશનમ્ ।
યચ્ચકાર સ રાજા ચ તન્મમાચક્ષ્વ ભૂધર ॥ ૫૧.૫॥

શ્રીવરાહ ઉવાચ ।
પ્રત્યાગતમૃષિં દૃષ્ટ્વા ભદ્રાશ્વઃ શ્વેતવાહનઃ ।
વરાસનગતં દૃષ્ટ્વા કૃત્વા પૂજાં વિશેષતઃ ।
અપૃચ્છન્મોક્ષધર્માખ્યં પ્રશ્નં સકલધારિણિ ॥ ૫૧.૬॥

ભદ્રાશ્વ ઉવાચ ।
ભગવન્ કર્મણા કેન છિદ્યતે ભવસંસૃતિઃ ।
કિં વા કૃત્વા ન શોચન્તિ મૂર્તામૂર્તોપપત્તિષુ ॥ ૫૧.૭॥

અગસ્ત્ય ઉવાચ ।

શ઼ૃણુ રાજન્ કથાં દિવ્યાં દૂરાસન્નવ્યવસ્થિતામ્ ।
દૃશ્યાદૃશ્યવિભાગોત્થાં સમાહિતમના નૃપ ॥ ૫૧.૮॥

નાહો ન રાત્રિર્ન દિશોઽદિશશ્ચ
ન દ્યૌર્ન દેવા ન દિનં ન સૂર્યઃ ।
તસ્મિન્ કાલે પશુપાલેતિ રાજા
સ પાલયામાસ પશૂનનેકાન્ ॥ ૫૧.૯॥

તાન્ પાલયન્ સ કદાચિદ્દિદૃક્ષુઃ
પૂર્વં સમુદ્રં ચ જગામ તૂર્ણમ્ ।
અનન્તપારસ્ય મહોદધેસ્તુ
તીરે વનં તત્ર વસન્તિ સર્પાઃ ॥ ૫૧.૧૦॥

અષ્ટૌ દ્રુમાઃ કામવહા નદી ચ
તિર્યક્ ચોર્ધ્વં બભ્રમુસ્તત્ર ચાન્યે ।
પઞ્ચ પ્રધાનાઃ પુરુષાસ્તથૈકાં
સ્ત્રિયં બિભ્રતે તેજસા દીપ્યમાનામ્ ॥ ૫૧.૧૧॥

સાઽપિ સ્ત્રી સ્વે વક્ષસિ ધારયન્તી
સહસ્રસૂર્યપ્રતિમં વિશાલમ્ ।
તસ્યાધરસ્ત્રિર્વિકારસ્ત્રિવર્ણ-
સ્તં રાજાનં પશ્ય પરિભ્રમન્તમ્ ॥ ૫૧.૧૨॥

તૂષ્ણીમ્ભૂતા મૃતકલ્પા ઇવાસન્
નૃપોઽપ્યસૌ તદ્વનં સંવિવેશ ।
તસ્મિન્ પ્રવિષ્ટે સર્વ એતે વિવિશુ-
ર્ભયાદૈક્યં ગતવન્તઃ ક્ષણેન ॥ ૫૧.૧૩॥

તૈઃ સર્પૈઃ સ નૃપો દુર્વિનીતૈઃ
સંવેષ્ટિતો દસ્યુભિશ્ચિન્તયાનઃ ।
કથં ચૈતેન ભવિષ્યન્તિ યેન
કથં ચૈતે સંસૃતાઃ સમ્ભવેયુઃ ॥ ૫૧.૧૪॥

એવં રાજ્ઞશ્ચિન્તયતસ્ત્રિવર્ણઃ પુરુષઃ પરઃ ।
શ્વેતં રક્તં તથા કૃષ્ણં ત્રિવર્ણં ધારયન્નરઃ ॥ ૫૧.૧૫॥

સ સંજ્ઞાં કૃતવાન્ મહ્યમપરોઽથ ક્વ યાસ્યસિ ।

એવં તસ્ય બ્રુવાણસ્ય મહન્નામ વ્યજાયત ॥ ૫૧.૧૬॥

તેનાપિ રાજા સંવીતઃ સ બુધ્યસ્વેતિ ચાબ્રવીત્ ।
એવમુક્તે તતઃ સ્ત્રી તુ તં રાજાનં રુરોધ હ ॥ ૫૧.૧૭॥

માયાતતં તં મા ભૈષ્ટ તતોઽન્યઃ પુરુષો નૃપમ્ ।
સંવેષ્ટ્ય સ્થિતવાન્ વીરસ્તતઃ સર્વેશ્વરેશ્વરઃ ॥ ૫૧.૧૮॥

તતોઽન્યે પઞ્ચ પુરુષા આગત્ય નૃપસત્તમમ્ ।
સંવિષ્ટ્ય સંસ્થિતાઃ સર્વે તતો રાજા વિરોધિતઃ ॥ ૫૧.૧૯॥

રુદ્ધે રાજનિ તે સર્વે એકીભૂતાસ્તુ દસ્યવઃ ।
મથિતું શસ્ત્રમાદાય લીનાઽન્યોઽન્યં તતો ભયાત્ ॥ ૫૧.૨૦॥

તૈર્લીનૈર્નૃપર્તેર્વેશ્મ બભૌ પરમશોભનમ્ ।
અન્યેષામપિ પાપાનાં કોટિઃ સાગ્રાભવન્નૃપ ॥ ૫૧.૨૧॥

ગૃહે ભૂસલિલં વહ્નિઃ સુખશીતશ્ચ મારુતઃ ।
સાવકાશાનિ શુભ્રાણિ પઞ્ચૈકોનગુણાનિ ચ ॥ ૫૧.૨૨॥

એકૈવ તેષાં સુચિરં સંવેષ્ટ્યાસજ્યસંસ્થિતા ।
એવં સ પશુપાલોઽસૌ કૃતવાનગ્જસા નૃપ ॥ ૫૧.૨૩॥

તસ્ય તલ્લાઘવં દૃષ્ટ્વા રૂપં ચ નૃપતેર્મૃધે ।
ત્રિવર્ણઃ પુરુષો રાજન્નબ્રવીદ્રાજસત્તમમ્ ॥ ૫૧.૨૪॥

ત્વત્પુત્રોઽસ્મિ મહારાજ બ્રૂહિ કિં કરવાણિ તે ।
અસ્માભિર્બન્ધુમિચ્છદ્ભિર્ભવન્તં નિશ્ચયઃ કૃતઃ ॥ ૫૧.૨૫॥

યદિ નામ કૃતાઃ સર્વે વયં દેવ પરાજિતાઃ ।
એવમેવ શરીરેષુ લીનાસ્તિષ્ઠામ પાર્થિવ ॥ ૫૧.૨૬॥

મય્યેકે તવ પુત્રત્વં ગતે સર્વેષુ સમ્ભવઃ ।
એવમુક્તસ્તતો રાજા તં નરં પુનરબ્રવીત્ ॥ ૫૧.૨૭॥

પુત્રો ભવતિ મે કર્ત્તા અન્યેષામપિ સત્તમ ।
યુષ્મત્સુખૈર્નરૈર્ભાવૈર્નાહં લિપ્યે કદાચન ॥ ૫૧.૨૮॥

એવમુક્ત્વા સ નૃપતિસ્તમાત્મજમથાકરોત્ ।
તૈર્વિમુક્તઃ સ્વયં તેષાં મધ્યે સ વિરરામ હ ॥ ૫૧.૨૯॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે એકપઞ્ચાશોઽધ્યાયઃ ॥ ૫૧॥

sએન્ત્િઓન્દ્વિપઞ્ચાશત્તમોઽધ્યાયઃ

અગસ્ત્ય ઉવાચ ।
સ ત્રિવર્ણો નૃપોત્સૃષ્ટઃ સ્વતન્ત્રત્વાચ્ચ પાર્થિવ ।
અહં નામાનમસૃજત્ પુત્રં પુત્રસ્ત્રિવર્ણકમ્ ॥ ૫૨.૧॥

તસ્યાપિ ચાભવત્ કન્યા અવબોધસ્વરૂપિણી ।
સા તુ વિજ્ઞાનદં પુત્રં મનોજ્ઞં વિસસર્જ હ ॥ ૫૨.૨॥

તસ્યાપિ સર્વરૂપાઃ સ્યુસ્તનયાઃ પઞ્ચભોગિનઃ ।
યથાસઙ્ખ્યેન પુત્રાસ્તુ તેષામક્ષાભિધાનકાઃ ॥ ૫૨.૩॥

એતે પૂર્વં દસ્યવઃ સ્યુસ્તતો રાજ્ઞા વશીકૃતાઃ ।
અમૂર્ત્તા ઇવ તે સર્વે ચક્રુરાયતનં શુભમ્ ॥ ૫૨.૪॥

નવદ્વારં પુરં તસ્ય ત્વેકસ્તમ્ભં ચતુષ્પથમ્ ।
નદીસહસ્રસઙ્કીર્ણં જલકૃત્યસમાસ્થિતમ્ ॥ ૫૨.૫॥

તત્પુરં તે પ્રવિવિશુરેકીભૂતાસ્તતો નવ ।
પુરુષો મૂર્ત્તિમાન્ રાજા પશુપાલોઽભવત્ ક્ષણાત્ ॥ ૫૨.૬॥

તતસ્તત્પુરસંસ્થસ્તુ પશુપાલો મહાનૃપઃ ।
સંસૂચ્ય વાચકાઞ્છબ્દાન્ વેદાન્ સસ્માર તત્પુરે ॥ ૫૨.૭॥

આત્મસ્વરૂપિણો નિત્યાસ્તદુક્તાનિ વ્રતાનિ ચ ।
નિયમાન્ ક્રતવશ્ચૈવ સર્વાન્ રાજા ચકાર હ ॥ ૫૨.૮॥

સ કદાચિન્નૃપઃ ખિન્નઃ કર્મકાણ્ડમરોચયત્ ।
સર્વજ્ઞો યોગનિદ્રાયાં સ્થિત્વા પુત્રં સસર્જ હ ॥ ૫૨.૯॥

ચતુર્વક્ત્રં ચતુર્બાહું ચતુર્વેદં ચતુષ્પથમ્ ।
તસ્માદારભ્ય નૃપતેર્વંશે પશ્ચાદયઃ સ્થિતાઃ ॥ ૫૨.૧૦॥

તસ્મિન્ સમુદ્રે સ નૃપો વને તસ્મિંસ્તથૈવ ચ ।
તૃણાદિષુ નૃપસ્સૈવ હસ્ત્યાદિષુ તથૈવ ચ ।
સમોઽભવત્ કર્મકાણ્ડાદનુજ્ઞાય મહામતે ॥ ૫૨.૧૧॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે દ્વિપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૫૨॥

# ત્રિપઞ્ચાશત્તમોઽધ્યાયઃ

ભદ્રાશ્વ ઉવાચ ।
મત્પ્રશ્નવિષયે બ્રહ્મન્ કથેયં કથિતા ત્વયા ।
તસ્યા વિભૂતિરભવત્ કસ્ય કેન કૃતેન હ ॥ ૫૩.૧॥

અગસ્ત્ય ઉવાચ ।
આગતેયં કથા ચિત્રા સર્વસ્ય વિષયે સ્થિતા ।
ત્વદ્દેહે મમ દેહે ચ સર્વજન્તુષુ સા સમા ॥ ૫૩.૨॥

તસ્યાં સમ્ભૂતિમિચ્છન્ યસ્તસ્યોપાયં સ્વયં પરમ્ ।
પશુપાલાત્ સમુત્પન્નો યશ્ચતુષ્પાચ્ચતુર્મુખઃ ॥ ૫૩.૩॥

સ ગુરુઃ સ કથાયાસ્તુ તસ્યાશ્ચૈવ પ્રવર્ત્તકઃ ।
તસ્ય પુત્રઃ સ્વરો નામ સપ્તમૂર્તિરસૌ સ્મૃતઃ ॥ ૫૩.૪॥

તેન પ્રોક્તં તુ યત્કિઞ્ચિત્ ચતુર્ણાં સાધનં નૃપ ।
ઋગર્થાનાં ચતુર્ભિસ્તે તદ્ભક્ત્યારાધ્યતાં યયુઃ ॥ ૫૩.૫॥

ચતુર્ણાં પ્રથમો યસ્તુ ચતુઃશૃઙ્ગસમાસ્થિતઃ ।
વૃષદ્વિતીયસ્તત્પ્રોક્તમાર્ગેણૈવ તૃતીયકઃ ।
ચતુર્થસ્તત્પ્રણીતસ્તાં પૂજ્ય ભક્ત્યાઽઽશુ તં વ્રજેત્ ॥ ૫૩.૬॥

સપ્તમૂર્ત્તેસ્તુ ચરિતં શુશ્રુવુઃ પ્રથમં નૃપ ।
બ્રહ્મચર્યેણ વર્ત્તેત દ્વિતીયોઽસ્ય સનાતનઃ ॥ ૫૩.૭॥

તતો ભૃત્યાદિભરણં વૃષભારોહણં ત્રિષુ ।
વનવાસશ્ચ નિર્દ્દિષ્ટ આત્મસ્થે વૃષભે સતિ ॥ ૫૩.૮॥

અહમસ્મિ વદત્યન્યશ્ચતુર્દ્ધા એકધા દ્વિધા ।
ભેદભિન્નસહોત્પન્નાસ્તસ્યાપત્યાનિ જજ્ઞિરે ॥ ૫૩.૯॥

નિત્યાનિત્યસ્વરૂપાણિ દૃષ્ટ્વા પૂર્વં ચતુર્મુખઃ ।
ચિન્તયામાસ જનકં કથં પશ્યામ્યહં નૃપ ॥ ૫૩.૧૦॥

મદીયસ્ય પિતુર્યે હિ ગુણા આસન્ મહાત્મનઃ ।
ન તે સમ્પ્રતિ દૃશ્યન્તે સ્વરાપત્યેષુ કેષુચિત્ ॥ ૫૩.૧૧॥

પિતુઃ પુત્રસ્ય યઃ પુત્રઃ સ પિતામહનામવાન્ ।
એવં શ્રુતિઃ સ્થિતા ચેયં સ્વરાપત્યેષુ નાન્યથા ॥ ૫૩.૧૨॥

ક્વાપિ સમ્પત્સ્યતે ભાવો દ્રષ્ટવ્યશ્ચાપિ તે પિતા ।
એવં નીતેઽપિ કિં કાર્યમિતિ ચિન્તાપરોઽભવત્ ॥ ૫૩.૧૩॥

તસ્ય ચિન્તયતઃ શસ્ત્રં પિતૃકં પુરતો બભૌ ।
તેન શસ્ત્રેણ તં રોષાન્મમન્થ સ્વરમન્તિકે ॥ ૫૩.૧૪॥

તસ્મિન્ મથિતમાત્રે તુ શિરસ્તસ્યાપિ દુર્ગ્રહમ્ ।
નાલિકેરફલાકારં ચતુર્વક્ત્રોઽન્વપશ્યત ॥ ૫૩.૧૫॥

તચ્ચાવૃતં પ્રધાનેન દશધા સંવૃતો બભૌ ।
ચતુષ્પાદેન શસ્ત્રેણ ચિચ્છેદ તિલકાણ્ડવત્ ॥ ૫૩.૧૬॥

પ્રકામં તિલસઞ્છિન્ને તદમૂલો ન મે બભૌ ।
અહં ત્વહં વદન્ ભૂતં તમપ્યેવમથાચ્છિનત્ ॥ ૫૩.૧૭॥

તસ્મિન્ ભાગે દૃશં કૃત્વા હ્રસ્વમન્યમવેક્ષત ।
અહં ભૂતાદિ વઃ પઞ્ચ વદન્તં ભૂતિમન્તિકાત્ ॥ ૫૩.૧૮॥

તમપ્યેવમથો છિત્ત્વા પઞ્ચાશૂન્યમમીક્ષત ।
કૃત્વાવકાશં તે સર્વે જલ્પન્ત ઇદમન્તિકાત્ ॥ ૫૩.૧૯॥

તમપ્યસઙ્ગશસ્ત્રેણ ચિચ્છેદ તિલકાણ્ડવત્ ।
તસ્મિઞ્છિન્ને દશાંશેન હ્રસ્વમન્યમપશ્યત ॥ ૫૩.૨૦॥

પુરુષં રૂપશસ્ત્રેણ તં છિત્ત્વાઽન્યમપશ્યત ।
તદ્વદ્ધ્રસ્વં સિતં સૌમ્યં તમપ્યેવં તદાઽકરોત્ ॥ ૫૩.૨૧॥

એવં કૃતે શરીરં તુ દદર્શ સ પુનઃ પ્રભુઃ ।
સ્વકીયમેવ તસ્યાન્તઃ પિતરં નૃપસત્તમ ॥ ૫૩.૨૨॥

ત્રસરેણુસમં મૂર્ત્યા અવ્યક્તં સર્વજન્તુષુ ।
સ મે દૃષ્ટ્વા પરં હર્ષમુભૌ હિ સ સ્વરોઽભવત્ ॥ ૫૩.૨૩॥

એવંવિધોઽસૌ પુરુષઃ સ્વરનામા મહાતપાઃ ।
મૂર્ત્તિસ્તસ્ય પ્રવૃત્તાખ્યં નિવૃત્તાખ્યં શિરો મહત્ ॥ ૫૩.૨૪॥

એતસ્માદેવ તસ્યાશુ કથયા રાજસત્તમ ।
સમ્ભૂતિરભવદ્રાજન્ વિવૃત્તેસ્ત્વેષ એવ તુ ॥ ૫૩.૨૫॥

એષેતિહાસઃ પ્રથમઃ સર્વસ્ય જગતો ભૃશમ્ ।
ય ઇમં વેત્તિ તત્ત્વેન સાક્ષાત્ કર્મપરો ભવેત્ ॥ ૫૩.૨૬॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે ત્રિપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૫૩ ॥

## ચતુઃપઞ્ચાશત્તમોઽધ્યાયઃ

ભદ્રાશ્વ ઉવાચ ।
વિજ્ઞાનોત્પત્તિકામસ્ય ક આરાધ્યો ભવેદ્દ્વિજ ।
કથં ચારાધ્યતેઽસૌ હિ એતદાખ્યાહિ મે દ્વિજ ॥ ૫૪.૧॥

અગસ્ત્ય ઉવાચ ।
વિષ્ણુરેવ સદાઽઽરાધ્યઃ સર્વદેવૈરપિ પ્રભુઃ ।
તસ્યોપાયં પ્રવક્ષ્યામિ યેનાસૌ વરદો ભવેત્ ॥ ૫૪.૨॥

રહસ્યં સર્વદેવાનાં મુનીનાં મનુજાંસ્તથા ।
નારાયણઃ પરો દેવસ્તં પ્રણમ્ય ન સીદતિ ॥ ૫૪.૩॥

શ્રૂયતે ચ પુરા રાજન્ નારદેન મહાત્મના ।
કથિતં તુષ્ટિદં વિષ્ણોર્વ્રતમપ્સરસાં તથા ॥ ૫૪.૪॥

નારદસ્તુ પુરા કલ્પે ગતવાન્ માનસં સરઃ ।
સ્નાનાર્થં તત્ર ચાપશ્યત્ સર્વમપ્સરસાં ગણમ્ ॥ ૫૪.૫॥

તાસ્તં દૃષ્ટ્વા વિલાસિન્યો જટામુકુટધારિણમ્ ।
અસ્થિચર્માવશેષં તુ છત્રદણ્ડકપાલિનમ્ ॥ ૫૪.૬॥

દેવાસુરમનુષ્યાણાં દિદૃક્ષું કલહપ્રિયમ્ ।
બ્રહ્મપુત્રં તપોયુક્તં પપ્રચ્છુસ્તા વરાઙ્ગનાઃ ॥ ૫૪.૭॥

અપ્સરસ ઊચુઃ ।
ભગવન્ બ્રહ્મતનય ભર્તૃકામા વયં દ્વિજ ।
નારાયણશ્ચ ભર્ત્તા નો યથા સ્યાત્ તત્ પ્રચક્ષ્વ નઃ ॥ ૫૪.૮॥

નારદ ઉવાચ ।
પ્રણામપૂર્વકઃ પ્રશ્નઃ સર્વત્ર વિહિતઃ શુભઃ ।
સ ચ મે ન કૃતો ગર્વાદ્યુષ્માભિર્યૌવનસ્મયાત્ ॥ ૫૪.૯॥

તથાપિ દેવદેવસ્ય વિષ્ણોર્યન્નામકીર્તિતમ્ ।
ભવતીભિસ્તથા ભર્ત્તા ભવત્વિતિ હરિઃ કૃતઃ ।

તન્નામોચ્ચારણાદેવ કૃતં સર્વં ન સંશયઃ ॥ ૫૪.૧૦॥

ઇદાનીં કથયામ્યાશુ વ્રતં યેન હરિઃ સ્વયમ્ ।
વરદત્વમવાપ્નોતિ ભર્તૃત્વં ચ નિયચ્છતિ ॥ ૫૪.૧૧॥

નારદ ઉવાચ ।
વસન્તે શુક્લપક્ષસ્ય દ્વાદશી યા ભવેચ્છુભા ।
તસ્યામુપોષ્ય વિધિવન્નિશાયાં હરિમર્ચ્ચયેત્ ॥ ૫૪.૧૨॥

પર્યઙ્કાસ્તરણં કૃત્વા નાનાચિત્રસમન્વિતમ્ ।
તત્ર લક્ષ્મ્યા યુતં રૌપ્યં હરિં કૃત્વા નિવેશયેત્ ॥ ૫૪.૧૩॥

તસ્યોપરિ તતઃ પુષ્પૈર્મણ્ડપં કારયેદ્બુધઃ ।
નૃત્યવાદિત્રગેયૈશ્ચ જાગરં તત્ર કારયેત્ ॥ ૫૪.૧૪॥

નમો ભવાયેતિ શિર અનઙ્ગાયેતિ વૈ કટિમ્ ।
કામાય બાહુમૂલે તુ સુશાસ્ત્રાયેતિ ચોદરમ્ ॥ ૫૪.૧૫॥

મન્મથાયેતિ પાદૌ તુ હરયેતિ ચ સર્વતઃ ।
પુષ્પૈઃ સમ્પૂજ્ય દેવેશં મલ્લિકાજાતિભિસ્તથા ॥ ૫૪.૧૬॥

પશ્ચાચ્ચતુર આદાય ઇક્ષુદણ્ડાન્ સુશોભનાન્ ।
ચતુર્દિક્ષુ ન્યસેત્ તસ્ય દેવસ્ય પ્રણતો નૃપ ॥ ૫૪.૧૭॥

એવં કૃત્વા પ્રભાતે તુ પ્રદદ્યાદ્બ્રાહ્મણાય વૈ ।
વેદવેદાઙ્ગયુક્તાય સમ્પૂર્ણાઙ્ગાય ધીમતે ॥ ૫૪.૧૮॥

બ્રાહ્મણાંશ્ચ તથા પૂજ્ય વ્રતમેતત્ સમાપયેત્ ।
એવં કૃતે તથા વિષ્ણુર્ભર્ત્તા વો ભવિતા ધ્રુવમ્ ॥ ૫૪.૧૯॥

અકૃત્વા મત્પ્રણામં તુ પૃષ્ટો ગર્વેણ શોભનાઃ ।
અવમાનસ્ય તસ્યાયં વિપાકો વો ભવિષ્યતિ ॥ ૫૪.૨૦॥

એતસ્મિન્નેવ સરસિ અષ્ટાવક્રો મહામુનિઃ ।
તસ્યોપહાસં કૃત્વા તુ શાપં લપ્સ્યથ શોભનાઃ ॥ ૫૪.૨૧॥

વ્રતેનાનેન દેવેશં પતિં લબ્ધ્વાઽભિમાનતઃ ।
અવમાનેન હરણં ગોપાલૈર્વો ભવિષ્યતિ ।
પુરા હર્ત્તા ચ કન્યાનાં દેવો ભર્ત્તા ભવિષ્યતિ ॥ ૫૪.૨૨॥

અગસ્ત્ય ઉવાચ ।

એવમુક્ત્વા સ દેવર્ષિઃ પ્રયયૌ નારદઃ ક્ષણાત્ ।
તા અપ્યેતદ્વ્રતં ચક્રુસ્તુષ્ટશ્ચાસાં સ્વયં હરિઃ ॥ ૫૪.૨૩ ॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે ચતુઃપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૫૪ ॥

## પઞ્ચપઞ્ચાશત્તમોઽધ્યાયઃ

અગસ્ત્ય ઉવાચ ।
શ‍ૃણુ રાજન્ મહાભાગ વ્રતાનામુત્તમં વ્રતમ્ ।
યેન સમ્પ્રાપ્યતે વિષ્ણુઃ શુભેનૈવ ન સંશયઃ ॥ ૫૫.૧ ॥

માર્ગશીર્ષેઽથ માસે તુ પ્રથમાહ્નાત્ સમારભેત્ ।
એકભક્તં સિતે પક્ષે યાવત્ સ્યાદ્દશમી તિથિઃ ॥ ૫૫.૨ ॥

તતો દશમ્યાં મધ્યાહ્ને સ્નાત્વા વિષ્ણું સમર્ચ્ય ચ ।
ભક્ત્યા સઙ્કલ્પયેત્ પ્રાગ્વદ્દ્વાદશીં પક્ષતો નૃપ ॥ ૫૫.૩ ॥

તામપ્યેવમુષિત્વા ચ યવાન્ વિપ્રાય દાપયેત્ ।
કૃષ્ણાયેતિ હરિર્વાચ્યો દાને હોમે તથાર્ચ્ચને ॥ ૫૫.૪ ॥

ચાતુર્માસ્યમથૈવં તુ ક્ષપિત્વા રાજસત્તમ ।
ચૈત્રાદિષુ પુનસ્તદ્વદુપોષ્ય પ્રયતઃ સુધીઃ ।
સક્તુપાત્રાણિ વિપ્રાણાં સહિરણ્યાનિ દાપયેત્ ॥ ૫૫.૫ ॥

શ્રાવણાદિષુ માસેષુ તદ્વચ્છાલિં પ્રદાપયેત્ ।
ત્રિષુ માસેષુ યાવચ્ચ કાર્ત્તિકસ્યાદિરાગતઃ ॥ ૫૫.૬ ॥

તમપ્યેવં ક્ષપિત્વા તુ દશમ્યાં પ્રયતઃ શુચિઃ ।
અર્ચયિત્વા હરિં ભક્ત્યા માસનામ્ના વિચક્ષણઃ ॥ ૫૫.૭ ॥

સઙ્કલ્પં પૂર્વવદ્ભક્ત્યા દ્વાદશ્યાં સંયતેન્દ્રિયઃ ।
એકાદશ્યાં યથાશક્ત્યા કારયેત્ પૃથિવીં નૃપ ॥ ૫૫.૮ ॥

કાઞ્ચનાઙ્ગાં ચ પાતાલકુલપર્વતસંયુતામ્ ।
ભૂમિન્યાસવિધાનેન સ્થાપયેત્ તાં હરેઃ પુરઃ ॥ ૫૫.૯ ॥

સિતવસ્ત્રયુગચ્છન્નાં સર્વબીજસમન્વિતામ્ ।
સમ્પૂજ્ય પ્રિયદત્તેતિ પઞ્ચરત્નૈર્વિચક્ષણઃ ॥ ૫૫.૧૦ ॥

જાગરં તત્ર કુર્વીત પ્રભાતે તુ પુનર્દ્વિજાન્ ।

આમન્ત્ર્ય સઙ્ખ્યયા રાજંશ્ચતુર્વિંશતિ યાવતઃ ॥ ૫૫.૧૧॥

તેષાં એકૈકશો ગાં ચ અનડ્વાહં ચ દાપયેત્ ।
એકૈકં વસ્ત્રયુગ્મં ચ અઙ્ગુલીયકમેવ ચ ॥ ૫૫.૧૨॥

કટકાનિ ચ સૌવર્ણકર્ણાભરણકાનિ ચ ।
એકૈકં ગ્રામમેતેષાં રાજા રાજન્ પ્રદાપયેત્ ॥ ૫૫.૧૩॥

તન્મધ્યમં સયુગ્મં તુ સર્વમાદ્યં પ્રદાપયેત્ ।
સ્વશક્ત્યાભરણં ચૈવ દરિદ્રસ્ય સ્વશક્તિતઃ ॥ ૫૫.૧૪॥

યથાશક્ત્યા મહીં કૃત્વા કાઞ્ચનીં ગોયુગં તથા ।
વસ્ત્રયુગ્મં ચ દાતવ્યં યથાવિભવશક્તિતઃ ॥ ૫૫.૧૫॥

ગાં યુગ્માભરણાત્ સર્વં સહિરણ્યં ચ કારયેત્ ।
એવં કૃતે તથા કૃષ્ણશુક્લદ્વાદશ્યામેવ ચ ॥ ૫૫.૧૬॥

રૌપ્યાં વા પૃથિવીં કૃત્વા યથાવિભવશક્તિતઃ ।
દાપયેદ્બ્રાહ્મણાનાં તુ તથા તેષાં ચ ભોજનમ્ ।
ઉપાનહૌ યથાશક્ત્યા પાદુકે છત્રિકાં તથા ॥ ૫૫.૧૭॥

એતાન્ દત્ત્વા વદેદેવં કૃષ્ણો દામોદરો મમ ।
પ્રીયતાં સર્વદા દેવો વિશ્વરૂપો હરિર્મમ ॥ ૫૫.૧૮॥

દાને ચ ભોજને ચૈવ કૃત્વા યત્ ફલમાપ્યતે ।
તન્ન શક્યં સહસ્રેણ વર્ષાણામપિ કીર્તિતુમ્ ॥ ૫૫.૧૯॥

તથાપ્યુદ્દેશતઃ કિઞ્ચિત્ ફલં વક્ષ્યામિ તેઽનઘ ।
વ્રતસ્યાસ્ય પુરા વૃત્તં શુભાન્યસ્ય શ‍ૃણુષ્વ તત્ ॥ ૫૫.૨૦॥

આસીદાદિયુગે રાજા બ્રહ્મવાદી દૃઢવ્રતઃ ।
સ પુત્રકામઃ પપ્રચ્છ બ્રહ્માણં પરમેષ્ઠિનમ્ ।
તસ્યેદં વ્રતમાચખ્યૌ બ્રહ્મા સ કૃતવાંસ્તથા ॥ ૫૫.૨૧॥

તસ્ય વ્રતાન્તે વિશ્વાત્મા સ્વયં પ્રત્યક્ષતાં યયૌ ।
તુષ્ટશ્ચોવાચ ભો રાજન્ વરો મે વ્રિયતાં વરઃ ॥ ૫૫.૨૨॥

રાજોવાચ ।
પુત્રં મે દેહિ દેવેશ વેદમન્ત્રવિશારદમ્ ।
યાજકં યજનાસક્તં કીર્ત્યા યુક્તં ચિરાયુષમ્ ।

અસઙ્ખ્યાતગુણં ચૈવ બ્રહ્મભૂતમકલ્મષમ્ ॥ ૫૫.૨૩ ॥

એવમુક્ત્વા તતો રાજા પુનર્વચનમબ્રવીત્ ।
મમાપ્યન્તે શુભં સ્થાનં પ્રયચ્છ પરમેશ્વર ।
યત્તન્મુનિપદં નામ યત્ર ગત્વા ન શોચતિ ॥ ૫૫.૨૪ ॥

એવમસ્ત્વિતિ તં દેવઃ પ્રોક્ત્વા ચાદર્શનં ગતઃ ।
તસ્યાપિ રાજ્ઞઃ પુત્રોઽભૂદ્વત્સશ્રીર્નામ નામતઃ ॥ ૫૫.૨૫ ॥

વેદવેદાઙ્ગસમ્પન્નો યજ્ઞયાજી બહુશ્રુતઃ ।
તસ્ય કીર્ત્તિર્મહારાજ વિસ્તૃતા ધરણીતલે ॥ ૫૫.૨૬ ॥

રાજાઽપિ તં સુતં લબ્ધ્વા વિષ્ણુદત્તં પ્રતાપિનમ્ ।
જગામ તપસે યુક્તઃ સર્વદ્વન્દ્વાન્ પ્રહાય સઃ ॥ ૫૫.૨૭ ॥

આરાધયામાસ હરિં નિરાહારો જિતેન્દ્રિયઃ ।
હિમવત્પર્વતે રમ્યે સ્તુતિં કુર્વંસ્તદા નૃપઃ ॥ ૫૫.૨૮ ॥

ભદ્રાશ્વ ઉવાચ ।
કીદૃશી સા સ્તુતિર્બ્રહ્મન્ યાં ચકાર સ પાર્થિવઃ ।
કિં ચ તસ્યાભવદ્દેવં સ્તુવતઃ પુરુષોત્તમમ્ ॥ ૫૫.૨૯ ॥

દુર્વાસા ઉવાચ ।
હિમવન્તં સમાશ્રિત્ય રાજા તદ્ગતમાનસઃ ।
સ્તુતિં ચકાર દેવાય વિષ્ણવે પ્રભવિષ્ણવે ॥ ૫૫.૩૦ ॥

રાજોવાચ ।
ક્ષરાક્ષરં ક્ષીરસમુદ્રશાયિનં ક્ષિતીધરં મૂર્તિમતાં પરં પદમ્ ।
અતીન્દ્રિયં વિશ્વભુજાં પુરઃ કૃતં નિરાકૃતં સ્તૌમિ જનાર્દનં પ્રભુમ્ ॥ ૫૫.૩૧ ॥

ત્વમાદિદેવઃ પરમાર્થરૂપી વિભુઃ પુરાણઃ પુરુષોત્તમશ્ચ ।
અતીન્દ્રિયો વેદવિદાં પ્રધાનઃ પ્રપાહિ માં શઙ્ખગદાસ્ત્રપાણે ॥ ૫૫.૩૨ ॥

કૃતં ત્વયા દેવ સુરાસુરાણાં સઙ્કીર્ત્યતેઽસૌ ચ અનન્તમૂર્તે ।
સૃષ્ટ્યર્થમેતત્ તવ દેવ વિષ્ણો ન ચેષ્ટિતં કૂટગતસ્ય તત્સ્યાત્ ॥ ૫૫.૩૩ ॥

તથૈવ કૂર્મત્વમૃગત્વમુચ્ચૈસ્ત્વયા કૃતં રૂપમનેકરૂપ ।
સર્વજ્ઞભાવાદસકૃચ્ચ જન્મ સઙ્કીર્ત્યતે તેઽચ્યુત નૈતદસ્તિ ॥ ૫૫.૩૪ ॥

નૃસિંહ નમો વામન જમદગ્નિનામ દશાસ્યગોત્રાન્તક વાસુદેવ ।

નમોઽસ્તુ તે બુદ્ધ કલ્કિન્ ખગેશ શમ્ભો નમસ્તે વિબુધારિનાશન ॥ ૫૫.૩૫॥

નમોઽસ્તુ નારાયણ પદ્મનાભ નમો નમસ્તે પુરુષોત્તમાય ।
નમઃ સમસ્તામરસઙ્ઘપૂજ્ય નમોઽસ્તુ તે સર્વવિદાં પ્રધાન ॥ ૫૫.૩૬॥

નમઃ કરાલાસ્ય નૃસિંહમૂર્ત્તે નમો વિશાલાદ્રિસમાન કૂર્મ ।
નમઃ સમુદ્રપ્રતિમાન મત્સ્ય નમામિ ત્વાં ક્રોડરૂપિન્નનન્ત ॥ ૫૫.૩૭॥

સૃષ્ટ્યર્થમેતત્ તવ દેવ ચેષ્ટિતં ન મુખ્યપક્ષે તવ મૂર્ત્તિતા વિભો ।
અજાનતા ધ્યાનમિદં પ્રકાશિતં નૈભિર્વિના લક્ષ્યસે ત્વં પુરાણ ॥ ૫૫.૩૮॥

આદ્યો મખસ્ત્વં સ્વયમેવ વિષ્ણો મખાઙ્ગભૂતોઽસિ હવિસ્ત્વમેવ ।
પશુર્ભવાન્ ઋત્વિગિજ્યં ત્વમેવ ત્વાં દેવસઙ્ઘા મુનયો યજન્તિ ॥ ૫૫.૩૯॥

યદેતસ્મિન્ જગદ્ધ્રુવં ચલાચલં સુરાદિકાલાનલસંસ્થમુત્તમમ્ ।
ન ત્વં વિભક્તોઽસિ જનાર્દનેશ પ્રયચ્છ સિદ્ધિં હૃદયેપ્સિતાં મે ॥ ૫૫.૪૦॥

નમઃ કમલપત્રાક્ષ મૂર્ત્તામૂર્ત્ત નમો હરે ।
શરણં ત્વાં પ્રપન્નોઽસ્મિ સંસારાન્માં સમુદ્ધર ॥ ૫૫.૪૧॥

એવં સ્તુતસ્તદા દેવસ્તેન રાજ્ઞા મહાત્મના ।
વિશાલામ્રતલસ્થેન તુતોષ પરમેશ્વરઃ ॥ ૫૫.૪૨॥

કુબ્જરૂપી તતો ભૂત્વા આજગામ હરિઃ સ્વયમ્ ।
તસ્મિન્નાગતમાત્રે તુ સોપ્યામ્રઃ કુબ્જકોઽભવત્ ॥ ૫૫.૪૩॥

તં દૃષ્ટ્વા મહદાશ્ચર્યં સ રાજા સંશિતવ્રતઃ ।
વિશાલસ્ય કથં કૌબ્જ્યમિતિ ચિન્તાપરોભવત્ ॥ ૫૫.૪૪॥

તસ્ય ચિન્તયતો બુદ્ધિર્બભૌ તં બ્રાહ્મણં પ્રતિ ।
અનેનાગતમાત્રેણ કૃતમેતન્ન સંશયઃ ॥ ૫૫.૪૫॥

તસ્માદેષૈવ ભવિતા ભગવાન્ પુરુષોત્તમઃ ।
એવમુક્ત્વા નમશ્ચક્રે તં વિપ્રં સ નૃપોત્તમઃ ॥ ૫૫.૪૬॥

અનુગ્રહાય ભગવન્ નૂનં ત્વં પુરુષોત્તમઃ ।
આગતોઽસિ સ્વરૂપં મે દર્શયસ્વાધુના હરે ॥ ૫૫.૪૭॥

એવમુક્તસ્તદા દેવઃ શઙ્ખચક્રગદાધરઃ ।
બભૌ તત્પુરતઃ સૌમ્યો વાક્યં ચેદમુવાચ હ ॥ ૫૫.૪૮॥

વરં વૃણીષ્વ રાજેન્દ્ર યત્તે મનસિ વર્તતે ।
મયિ પ્રસન્ને ત્રૈલોક્યં તિલમાત્રમિદં નૃપ ॥ ૫૫.૪૯॥

એવમુક્તસ્તતો રાજા હર્ષોત્ફુલ્લિતલોચનઃ ।
મોક્ષં પ્રયચ્છ દેવેશેત્યુક્ત્વા નોવાચ કિઞ્ચન ॥ ૫૫.૫૦॥

એવમુક્તઃ સ ભગવાન્ પુનર્વાક્યમુવાચ હ ।
મય્યાગતે વિશાલોઽયમામ્રઃ કુબ્જત્વમાગતઃ ।
યસ્માત્ તસ્માત્ તીર્થમિદં કુબ્જકામ્રં ભવિષ્યતિ ॥ ૫૫.૫૧॥

તિર્યગ્યોન્યાદયોઽપ્યસ્મિન્ બ્રાહ્મણા વા યદિ સ્વકમ્ ।
કલેવરં ત્યજિષ્યન્તિ તેષાં પઞ્ચશતાનિ ચ ।
વિમાનાનિ ભવિષ્યન્તિ યોગિનાં મુક્તિરેવ ચ ॥ ૫૫.૫૨॥

એવમુક્ત્વા નૃપં દેવઃ શઙ્ખાગ્રેણ જનાર્દનઃ ।
પસ્પર્શ સ્પૃષ્ટમાત્રોઽસૌ પરં નિર્વાણમાપ્તવાન્ ॥ ૫૫.૫૩॥

તસ્માત્ત્વમપિ રાજેન્દ્ર તં દેવં શરણં વ્રજ ।
યેન ભૂયઃ પુનઃ શોચ્યપદવીં નો પ્રયાસ્યસિ ॥ ૫૫.૫૪॥

ય ઇદં શૃણુયાન્નિત્યં પ્રાતરુત્થાય માનવઃ ।
પઠેદ્યશ્ચરિતં તાભ્યાં મોક્ષધર્માર્થદો ભવેત્ ॥ ૫૫.૫૫॥

શુભવ્રતમિદં પુણ્યં યશ્ચ કુર્યાજ્જનેશ્વર ।
સ સર્વસમ્પદં ચેહ ભુક્ત્વાન્તે તલ્લયં વ્રજેત્ ॥ ૫૫.૫૬॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે પઞ્ચપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૫૫॥

## ષટ્પઞ્ચાશત્તમોઽધ્યાયઃ

અગસ્ત્ય ઉવાચ ।
અતઃ પરં પ્રવક્ષ્યામિ ધન્યવ્રતમનુત્તમમ્ ।
યેન સદ્યો ભવેદ્ધન્ય અધન્યોઽપિ હિ યો ભવેત્ ॥ ૫૬.૧॥

માર્ગશીર્ષે સિતે પક્ષે પ્રતિપદ્યા તિથિર્ભવેત્ ।
તસ્યાં નક્તં પ્રકુર્વીત વિષ્ણુમગ્નિં પ્રપૂજયેત્ ॥ ૫૬.૨॥

વૈશ્વાનરાય પાદૌ તુ અગ્નયેત્યુદરં તથા ।
હવિર્ભુઞ્જાય ચ ઉરો દ્રવિણોદેતિ વૈ ભુજો ॥ ૫૬.૩॥

સંવર્ત્તાયેતિ ચ શિરો જ્વલનાયેતિ સર્વતઃ ।
અભ્યર્ચ્યૈવં વિધાનેન દેવદેવં જનાર્દનમ્ ॥ ૫૬.૪॥

તસ્યૈવ પુરતઃ કુણ્ડં કારયિત્વા વિધાનતઃ ।
હોમં તત્ર પ્રકુર્વીત એભિર્મન્ત્રૈર્વિચક્ષણઃ ॥ ૫૬.૫॥

તતઃ સંયાવકં ચાન્નં ભુઞ્જીયાદ્ઘૃતસંયુતમ્ ।
કૃષ્ણપક્ષેઽપ્યેવમેવ ચાતુર્માસ્યં તુ યાવતઃ ॥ ૫૬.૬॥

ચૈત્રાદિષુ ચ ભુઞ્જીત પાયસં સઘૃતં બુધઃ ।
શ્રાવણાદિષુ સક્તૂંશ્ચ તતશ્ચૈતત્ સમાપ્યતે ॥ ૫૬.૭॥

સમાપ્તે તુ વ્રતે વહ્નિં કાઞ્ચનં કારયેદ્બુધઃ ।
રક્તવસ્ત્રયુગચ્છન્નં રક્તપુષ્પાનુલેપનમ્ ॥ ૫૬.૮॥

કુઙ્કુમેન તથા લિપ્ય બ્રાહ્મણં સત્ત્વમેવ ચ ।
સર્વાવયવસમ્પૂર્ણં બ્રાહ્મણં પ્રિયદર્શનમ્ ॥ ૫૬.૯॥

પૂજયિત્વા વિધાનેન રક્તવસ્ત્રયુગેન ચ ।
પશ્ચાત્ તં દાપયેત્ તસ્ય મન્ત્રેણાનેન બુદ્ધિમાન્ ॥ ૫૬.૧૦॥

ધન્યોઽસ્મિ ધન્યકર્માઽસ્મિ ધન્યચેષ્ટોઽસ્મિ ધન્યવાન્ ।
ધન્યેનાનેન ચીર્ણેન વ્રતેન સ્યાં સદા સુખી ॥ ૫૬.૧૧॥

એવમુચ્ચાર્ય તં વિપ્રે ન્યસ્ય કોશં મહાત્મનઃ ।
સદ્યો ધન્યત્વમાપ્નોતિ યોઽપિ સ્યાદ્ભોગવર્જિતઃ ॥ ૫૬.૧૨॥

ઇહ જન્મનિ સૌભાગ્યં ધનં ધાન્યં ચ પુષ્કલમ્ ।
અનેન કૃતમાત્રેણ જાયતે નાત્ર સંશયઃ ॥ ૫૬.૧૩॥

પ્રાગ્જન્મજનિતં પાપમગ્નિર્દહતિ તસ્ય હ ।
દગ્ધે પાપે વિમુક્તાત્મા ઇહ જન્મન્યસૌ ભવેત્ ॥ ૫૬.૧૪॥

યોઽપીદં શ઼ૃણુયાન્નિત્યં યશ્ચ ભક્ત્યા પઠેદ્દ્વિજઃ ।
ઉભૌ તાવિહ લોકે તુ ધન્યૌ સદ્યો ભવિષ્યતઃ ॥ ૫૬.૧૫॥

શ્રૂયતે ચ વ્રતં ચૈતચ્ચીર્ણમાસીન્મહાત્મના ।
ધનદેન પુરા કલ્પે શૂદ્રયોનૌ સ્થિતેન તુ ॥ ૫૬.૧૬॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે ષટ્પઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૫૬॥

# સપ્તપઞ્ચાશોઽધ્યાયઃ ।

અગસ્ત્ય ઉવાચ ।
અતઃ પરં પ્રવક્ષ્યામિ કાન્તિવ્રતમનુત્તમમ્ ।
યત્કૃત્વા તુ પુરા સોમઃ કાન્તિમાનભવત્ પુનઃ ॥ ૫૭.૧॥

યક્ષ્મણા દક્ષશાપેન પુરાક્રાન્તો નિશાકરઃ ।
એતચ્ચીર્ત્વા વ્રતં સદ્યઃ કાન્તિમાનભવત્ કિલ ॥ ૫૭.૨॥

દ્વિતીયાયાં તુ રાજેન્દ્ર કાર્ત્તિકસ્ય સિતે દિને ।
નક્તં કુર્વીત યત્નેન અર્ચયન્ બલકેશવમ્ ॥ ૫૭.૩॥

બલદેવાય પાદૌ તુ કેશવાય શિરોઽર્ચયેત્ ।
એવમભ્યર્ચ્ય મેધાવી વૈષ્ણવં રૂપમુત્તમમ્ ॥ ૫૭.૪॥

પરસ્વરૂપં સોમાખ્યં દ્વિકલં તદ્દિને હિ યત્ ।
તસ્યાર્ઘ્યં દાપયેદ્ધીમાન્ મન્ત્રેણ પરમેષ્ઠિનઃ ॥ ૫૭.૫॥

નમોઽસ્ત્વમૃતરૂપાય સર્વૌષધિનૃપાય ચ ।
યજ્ઞલોકાધિપતયે સોમાય પરમાત્મને ॥ ૫૭.૬॥

અનેનૈવ ચ માર્ગેણ દત્ત્વાર્ઘ્યં પરમેષ્ઠિનઃ ।
રાત્રૌ સવિપ્રો ભુઞ્જીત યવાન્નં સઘૃતં નરઃ ॥ ૫૭.૭॥

ફાલ્ગુનાદિચતુષ્કે તુ પાયસં ભોજયેચ્છુચિઃ ।
શાલિહોમં તુ કુર્વીત કાર્ત્તિકે તુ યવૈસ્તથા ॥ ૫૭.૮॥

આષાઢાદિચતુષ્કે તુ તિલહોમં તુ કારયેત્ ।
તદ્વત્ તિલાન્નં ભુઞ્જીત એષ એવ વિધિક્રમઃ ॥ ૫૭.૯॥

તતઃ સંવત્સરે પૂર્ણે શશિનં કૃતરાજતમ્ ।
સિતવસ્ત્રયુગચ્છન્નં સિતપુષ્પાનુલેપનમ્ ।
એવમેવ દ્વિજં પૂજ્ય તતસ્તં પ્રતિપાદયેત્ ॥ ૫૭.૧૦॥

કાન્તિમાનપિ લોકેઽસ્મિન્ સર્વજ્ઞઃ પ્રિયદર્શનઃ ।
ત્વત્પ્રસાદાત્ સોમરૂપિન્ નારાયણ નમોઽસ્તુ તે ॥ ૫૭.૧૧॥

અનેન કિલ મન્ત્રેણ દત્ત્વા વિપ્રાય વાગ્યતઃ ।
દત્તમાત્રે તતસ્તસ્મિન્ કાન્તિમાન્ જાયતે નરઃ ॥ ૫૭.૧૨॥

આત્રેયેણાપિ સોમેન કૃતમેતત્ પુરા નૃપ ।
તસ્ય વ્રતાન્તે સન્તુષ્ટઃ સ્વયમેવ જનાર્દનઃ ।
યક્ષ્માણમપનીયાશુ અમૃતાખ્યાં કલાં દદૌ ॥ ૫૭.૧૩॥

તાં કલાં સોમરાજાऽસૌ તપસા લબ્ધવાનિતિ ।
સોમત્વં ચાગમત્ સોऽસ્ય ઓષધીનાં પતિર્બભૌ ॥ ૫૭.૧૪॥

દ્વિતીયામશ્વિનૌ સોમભુજૌ કીર્ત્યેતે તદ્દિને નૃપ ।
તૌ શેષવિષ્ણૂ વિખ્યાતૌ મુખ્યપક્ષૌ ન સંશયઃ ॥ ૫૭.૧૫॥

ન વિષ્ણોર્વ્યતિરિક્તં સ્યાદ્દૈવતં નૃપસત્તમ ।
નામભેદેન સર્વત્ર સંસ્થિતઃ પરમેશ્વરઃ ॥ ૫૭.૧૬॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે સપ્તપઞ્ચાશોऽધ્યાયઃ ॥ ૫૭॥

## અષ્ટપઞ્ચાશોऽધ્યાયઃ ।

અગસ્ત્ય ઉવાચ ।
અતઃ પરં મહારાજ સૌભાગ્યકરણં વ્રતમ્ ।
શ ૃણુ યેનાશુ સૌભાગ્યં સ્ત્રીપુંસામુપજાયતે ॥ ૫૮.૧॥

ફાલ્ગુનસ્ય તુ માસસ્ય તૃતીયા શુક્લપક્ષતઃ ।
ઉપાસિતવ્યા નક્તેન શુચિના સત્યવાદિના ॥ ૫૮.૨॥

સશ્રીકં ચ હરિં પૂજ્ય રુદ્રં વા ચોમયા સહ ।
યા શ્રીઃ સા ગિરિજા પ્રોક્તા યો હરિઃ સ ત્રિલોચનઃ ॥ ૫૮.૩॥

એવં સર્વેષુ શાસ્ત્રેષુ પુરાણેષુ ચ પઠ્યતે ।
એતસ્માદન્યથા યસ્તુ બ્રૂતે શાસ્ત્રં પૃથક્તયા ॥ ૫૮.૪॥

રુદ્રો જનાનાં મર્ત્યાનાં કાવ્યં શાસ્ત્રં ન તદ્ભવેત્ ।
વિષ્ણું રુદ્રકૃતં બ્રૂયાત્ શ્રીગૌરી ન તુ પાર્થિવ ।
તન્નાસ્તિકાનાં મર્ત્યાનાં કાવ્યં જ્ઞેયં વિચક્ષણૈઃ ॥ ૫૮.૫॥

એવં જ્ઞાત્વા સલક્ષ્મીકં હરિં સમ્પૂજ્ય ભક્તિતઃ ।
મન્ત્રેણાનેન રાજેન્દ્ર તતસ્તં પરમેશ્વરમ્ ॥ ૫૮.૬॥

ગમ્ભીરાયેતિ પાદૌ તુ સુભગાયેતિ વૈ કટિમ્ ।
ઉદરં દેવદેવેતિ ત્રિનેત્રાયેતિ વૈ મુખમ્ ।

વાચસ્પતયે ચ શિરો રુદ્રાયેતિ ચ સર્વતઃ ॥ ૫૮.૭॥

એવમભ્યર્ચ્ય મેધાવી વિષ્ણું લક્ષ્મ્યા સમન્વિતમ્ ।
હરં વા ગૌરિસંયુક્તં ગન્ધપુષ્પાદિભિઃ ક્રમાત્ ॥ ૫૮.૮॥

તતસ્તસ્યાગ્રતો હોમં કારયેન્મધુસર્પિષા ।
તિલૈઃ સહ મહારાજ સૌભાગ્યપતયેતિ ચ ॥ ૫૮.૯॥

તતસ્ત્વક્ષારવિરસં નિઃસ્નેહં ધરણીતલે ।
ગોધૂમાન્નં તુ ભુઞ્જીત કૃષ્ણેઽપ્યેવં વિધિઃ સ્મૃતઃ ।
આષાઢાદિદ્વિતીયાં તુ પારણં તત્ર ભોજનમ્ ॥ ૫૮.૧૦॥

યવાન્નં તુ તતઃ પશ્ચાત્ કાર્ત્તિકાદિષુ પાર્થિવ ।
શ્યામાકં તત્ર ભુઞ્જીત ત્રીન્ માસાન્ નિયતઃ શુચિઃ ॥ ૫૮.૧૧॥

તતો માઘસિતે પક્ષે તૃતીયાયાં નરાધિપ ।
સૌવર્ણાં કારયેદ્ગૌરીં રુદ્રં ચૈકત્ર બુદ્ધિમાન્ ॥ ૫૮.૧૨॥

સલક્ષ્મીકં હરિં વાપિ યથાશક્ત્યા પ્રસન્નધીઃ ।
તતસ્તં બ્રાહ્મણે દદ્યાત્ પાત્રભૂતે વિચક્ષણે ॥ ૫૮.૧૩॥

અન્નેન હીને વેદાનાં પારગે સાધુવર્તિનિ ।
સદાચારેઽથ વા દદ્યાદલ્પવિત્તે વિશેષતઃ ॥ ૫૮.૧૪॥

ષડ્ભિઃ પાત્રૈરુપેતં તુ બ્રાહ્મણાય નિવેદયેત્ ।
એકં મધુમયં પાત્રં દ્વિતીયં ઘૃતપૂરિતમ્ ॥ ૫૮.૧૫॥

તૃતીયં તિલતૈલસ્ય ચતુર્થં ગુડસંયુતમ્ ।
પઞ્ચમં લવણૈઃ પૂર્ણં ષષ્ઠં ગોક્ષીરસંયુતમ્ ॥ ૫૮.૧૬॥

એતાનિ દત્ત્વા પાત્રાણિ સપ્તજન્માન્તરં ભવેત્ ।
સુભગો દર્શનીયશ્ચ નારી વા પુરુષોઽપિ વા ॥ ૫૮.૧૭॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે અષ્ટપઞ્ચાશોઽધ્યાયઃ ॥ ૫૮॥

## એકોનષષ્ટિતમોઽધ્યાયઃ

અગસ્ત્ય ઉવાચ ।
અથાવિઘ્નકરં રાજન્ કથયામિ શ ृણુષ્વ મે ।
યેન સમ્યક્ કૃતેનાપિ ન વિઘ્નમુપજાયતે ॥ ૫૯.૧॥

ચતુર્થ્યાં ફાલ્ગુને માસિ ગ્રહીતવ્યં વ્રતં ત્વિદમ્ ।
નક્તાહારેણ રાજેન્દ્ર તિલાન્નં પારણં સ્મૃતમ્ ।
તદેવાગ્નૌ તુ હોતવ્યં બ્રાહ્મણાય ચ તદ્ભવેત્ ॥ ૫૯.૨॥

ચાતુર્માસ્યં વ્રતં ચૈતત્ કૃત્વા વૈ પઞ્ચ મે તથા ।
સૌવર્ણં ગજવક્ત્રં તુ કૃત્વા વિપ્રાય દાપયેત્ ॥ ૫૯.૩॥

પાયસૈઃ પઞ્ચભિઃ પાત્રૈરુપેતં તુ તિલૈસ્તથા ।
એવં કૃત્વા વ્રતં ચૈતત્ સર્વવિઘ્નૈર્વિમુચ્યતે ॥ ૫૯.૪॥

હયમેધસ્ય વિઘ્ને તુ સઞ્જાતે સગરઃ પુરા ।
એતદેવ ચરિત્વા તુ હયમેધં સમાપ્તવાન્ ॥ ૫૯.૫॥

તથા રુદ્રેણ દેવેન ત્રિપુરં નિઘ્નતા પુરા ।
એતદેવ કૃતં તસ્માત્ ત્રિપુરં તેન પાતિતમ્ ।
મયા સમુદ્રં પિબતા એતદેવ કૃતં વ્રતમ્ ॥ ૫૯.૬॥

અન્યૈરપિ મહીપાલૈરેતદેવ કૃતં પુરા ।
તપોઽર્થિભિર્જ્ઞાનકૃતૈર્નિર્વિઘ્નાર્થે પરન્તપ ॥ ૫૯.૭॥

શૂરાય ધીરાય ગજાનનાય લમ્બોદરાયૈકદંષ્ટ્રાય ચૈવ ।
એવં પૂજ્યસ્તદ્દિને તત્પુનશ્ચ હોમં કુર્યાદ્વિઘ્નવિનાશહેતોઃ ॥ ૫૯.૮॥

અનેન કૃતમાત્રેણ સર્વવિઘ્નૈર્વિમુચ્યતે ।
વિનાયકસ્ય કૃપયા કૃતકૃત્યો નરો ભવેત્ ॥ ૫૯.૯॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે નવપઞ્ચાશોઽધ્યાયઃ ॥ ૫૯॥

## ષષ્ટિતમોઽધ્યાયઃ

અગસ્ત્ય ઉવાચ ।
શાન્તિવ્રતં પ્રવક્ષ્યામિ તવ રાજન્ શ‍ૃણુષ્વ તત્ ।
યેન ચીર્ણેન શાન્તિઃ સ્યાત્ સર્વદા ગૃહમેધિનામ્ ॥ ૬૦.૧॥

પઞ્ચમ્યાં શુક્લપક્ષસ્ય કાર્ત્તિકે માસિ સુવ્રત ।
આરભેદ્વર્ષમેકં તુ ભુઞ્જીયાદમ્લવર્જિતમ્ ॥ ૬૦.૨॥

નક્તે દેવં તુ સમ્પૂજ્ય હરિં શેષોપરિ સ્થિતમ્ ।

અનન્તાયેતિ પાદૌ તુ વાસુકયેતિ વૈ કટિમ્ ॥ ૬૦.૩॥

તક્ષકાયેતિ જઠરમુરઃ કર્કોટકાય ચ ।
પદ્માય કણ્ઠં સમ્પૂજ્ય મહાપદ્માય દોર્યુગમ્ ॥ ૬૦.૪॥

શઙ્ખપાલાય વક્ત્રં તુ કુટિલાયેતિ વૈ શિરઃ ।
એવં વિષ્ણુગતં પૂજ્ય પૃથક્ત્વેન ચ પૂજયેત્ ॥ ૬૦.૫॥

ક્ષીરેણ સ્નપનં કુર્યાત્ તાનુદ્દિશ્ય હરેઃ પુનઃ ।
તદગ્રે હોમયેત્ ક્ષીરં તિલૈઃ સહ વિચક્ષણઃ ॥ ૬૦.૬॥

એવં સંવત્સરસ્યાન્તે કુર્યાદ્બ્રાહ્મણભોજનમ્ ।
નાગં તુ કાઞ્ચનં કુર્યાદ્બ્રાહ્મણાય નિવેદયેત્ ॥ ૬૦.૭॥

એવં યઃ કુરુતે ભક્ત્યા વ્રતમેતન્નરાધિપ ।
તસ્ય શાન્તિર્ભવેન્નિત્યં નાગાનાં ન ભયં તથા ॥ ૬૦.૮॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે ષષ્ટિતમોઽધ્યાયઃ ॥ ૬૦॥

## એકષષ્ટિતમોઽધ્યાયઃ ।

અગસ્ત્ય ઉવાચ ।
કામવ્રતં મહારાજ શ‍ૃણુ મે ગદતોઽધુના ।
યેન કામાઃ સમૃદ્ધ્યન્તે મનસા ચિન્તિતા અપિ ॥ ૬૧.૧॥

ષષ્ઠ્યાં ફલાશનો યસ્તુ વર્ષમેકં વ્રતં ચરેત્ ।
પૌષમાસસિતે પક્ષે ચતુર્થ્યાં કૃતભોજનઃ ॥ ૬૧.૨॥

ષષ્ઠ્યાં તુ પારયેદ્ધીમાન્ પ્રથમં તુ ફલં નૃપ ।
તતો ભુઞ્જીત યત્નેન વાગ્યતઃ શુદ્ધમોદનમ્ ॥ ૬૧.૩॥

બ્રાહ્મણૈઃ સહ રાજેન્દ્ર અથવા કેવલૈઃ ફલૈઃ ।
તમેકં દિવસં સ્થિત્વા સપ્તમ્યાં પારયેન્નૃપ ॥ ૬૧.૪॥

અગ્નિકાર્યં તુ કુર્વીત ગુહરૂપેણ કેશવમ્ ।
પૂજયિત્વાભિધાનેન વર્ષમેકં વ્રતં ચરેત્ ॥ ૬૧.૫॥

ષડ્વક્ત્રઃ કાર્ત્તિકેયશ્ચ સેનાનીઃ કૃત્તિકાસુતઃ ।
કુમારઃ સ્કન્દ ઇત્યેવં પૂજ્યો વિષ્ણુઃ સ્વનામભિઃ ॥ ૬૧.૬॥

સમાપ્તૌ તુ વ્રતસ્યાસ્ય કુર્યાદ્બ્રાહ્મણભોજનમ્ ।
ષણ્મુખં સર્વસૌવર્ણં બ્રાહ્મણાય નિવેદયેત્ ॥ ૬૧.૭॥

સર્વે કામાઃ સમૃદ્ધ્યન્તાં મમ દેવ કુમારક ।
ત્વત્પ્રસાદાદિમં ભક્ત્યા ગૃહ્યતાં વિપ્ર મા ચિરમ્ ॥ ૬૧.૮॥

અનેન દત્ત્વા મન્ત્રેણ બ્રાહ્મણાય સયુગ્મકમ્ ।
તતઃ કામાઃ સમૃદ્ધ્યન્તે સર્વે વૈ ઇહ જન્મનિ ॥ ૬૧.૯॥

અપુત્રો લભતે પુત્રમધનો લભતે ધનમ્ ।
ભ્રષ્ટરાજ્યો લભેદ્રાજ્યં નાત્ર કાર્યા વિચારણા ॥ ૬૧.૧૦॥

એતદ્વ્રતં પુરા ચીર્ણં નલેન નૃપસત્તમ ।
ઋતુપર્ણસ્ય વિષયે વસતા વ્રતચર્યયા ॥ ૬૧.૧૧॥

તથા રાજ્યચ્યુતૈરન્યૈર્બહુભિર્નૃપસત્તમૈઃ ।
પૌરાણિકં વ્રતં ચૈવ સિદ્ધ્યર્થં નૃપસત્તમ ॥ ૬૧.૧૨॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે એકષષ્ટિતમોઽધ્યાયઃ ॥ ૬૧॥

## દ્વિષષ્ટતમોઽધ્યાયઃ ।

અગસ્ત્ય ઉવાચ ।
અથાપરં મહારાજ વ્રતમારોગ્યસંજ્ઞિતમ્ ।
કથયામિ પરં પુણ્યં સર્વપાપપ્રણાશનમ્ ॥ ૬૨.૧॥

તસ્યૈવ માઘમાસસ્ય સપ્તમ્યાં સમુપોષિતઃ ।
પૂજયેદ્ભાસ્કરં દેવં વિષ્ણુરૂપં સનાતનમ્ ॥ ૬૨.૨॥

આદિત્ય ભાસ્કર રવે ભાનો સૂર્ય દિવાકર ।
પ્રભાકરેતિ સમ્પૂજ્ય એવં સમ્પૂજ્યતે રવિઃ ॥ ૬૨.૩॥

ષષ્ઠ્યાં ચૈવ કૃતાહારઃ સપ્તમ્યાં ભાનુમર્ચયેત્ ।
અષ્ટમ્યાં ચૈવ ભુઞ્જીત એષ એવ વિધિક્રમઃ ॥ ૬૨.૪॥

અનેન વત્સરં પૂર્ણં વિધિના યોઽર્ચયેદ્રવિમ્ ।
તસ્યારોગ્યં ધનં ધાન્યમિહ જન્મમિ જાયતે ।
પરત્ર ચ શુભં સ્થાનં યદ્ગત્વા ન નિવર્તતે ॥ ૬૨.૫॥

સાર્વભૌમઃ પુરા રાજા અનરણ્યો મહાબલઃ ।

તેનાયમર્ચિતો દેવો વ્રતેનાનેન પાર્થિવ ।
તસ્ય તુષ્ટો વરં દેવઃ પ્રાદાદારોગ્યમુત્તમમ્ ॥ ૬૨.૬॥

ભદ્રાશ્વ ઉવાચ ।
કિમસૌ રોગવાન્ રાજા યેનારોગ્યમવાપ્તવાન્ ।
સાર્વભૌમસ્ય ચ કથં બ્રહ્મન્ રોગસ્ય સમ્ભવઃ ॥ ૬૨.૭॥

અગસ્ત્ય ઉવાચ ।
સ રાજા સાર્વભૌમોઽભૂદ્યશસ્વી ચ સુરૂપવાન્ ।
સ કદાચિન્નૃપશ્રેષ્ઠો નૃપશ્રેષ્ઠ મહાબલઃ ॥ ૬૨.૮॥

ગતવાન્ માનસં દિવ્યં સરો દેવગણાન્વિતમ્ ।
તત્રાપશ્યદ્બૃહત્પદ્મં સરોમધ્યગતં સિતમ્ ॥ ૬૨.૯॥

તત્ર ચાઙ્ગુષ્ઠમાત્રં તુ સ્થિતં પુરુષસત્તમમ્ ।
રક્તવાસોભિરાછન્નં દ્વિભુજં તિગ્મતેજસમ્ ॥ ૬૨.૧૦॥

તં દૃષ્ટ્વા સારથિં પ્રાહ પદ્મમેતત્ સમાનય ।
ઇદં તુ શિરસા બિભ્રત્ સર્વલોકસ્ય સન્નિધૌ ।
શ્લાઘનીયો ભવિષ્યામિ તસ્માદાહર મા ચિરમ્ ॥ ૬૨.૧૧॥

એવમુક્તસ્તદા તેન સારથિઃ પ્રવિવેશ હ ।
ગ્રહીતુમુપચક્રામ તં પદ્મં નૃપસત્તમ ॥ ૬૨.૧૨॥

સ્પૃષ્ટમાત્રે તતઃ પદ્મે હુઙ્કારઃ સમજાયત ।
તેન શબ્દેન સ ત્રસ્તઃ પપાત ચ મમાર ચ ॥ ૬૨.૧૩॥

રાજા ચ તત્ક્ષણાત્ તેન શબ્દેન સમપદ્યત ।
કુષ્ઠી વિગતવર્ણશ્ચ બલવીર્યવિવર્જિતઃ ॥ ૬૨.૧૪॥

તથાગતમથાત્માનં દૃષ્ટ્વા સ પુરુષર્ષભઃ ।
તસ્થૌ તત્રૈવ શોકાર્ત્તઃ કિમેતદિતિ ચિન્તયન્ ॥ ૬૨.૧૫॥

તસ્ય ચિન્તયતો ધીમાનાજગામ મહાતપાઃ ।
વસિષ્ઠો બ્રહ્મપુત્રોઽથ તં સ પપ્રચ્છ પાર્થિવમ્ ॥ ૬૨.૧૬॥

કથં તે રાજશાર્દૂલ તવ દેહસ્ય શાસનમ્ ।
ઇદાનીમેવ કિં કાર્યં તન્મમાચક્ષ્વ પૃચ્છતઃ ॥ ૬૨.૧૭॥

એવમુક્તસ્તતો રાજા વસિષ્ઠેન મહાત્મના ।

સર્વં પદ્મસ્ય વૃત્તાન્તં કથયામાસ સ પ્રભુઃ ॥ ૬૨.૧૮॥

તં શ્રુત્વા સ મુનિસ્તત્ર સાધુ રાજન્નથાબ્રવીત્ ।
અસાધુરથ વા તિષ્ઠ તસ્માત્ કુષ્ઠિત્વમાગતઃ ॥ ૬૨.૧૯॥

એવમુક્તસ્તદા રાજા વેપમાનઃ કૃતાઞ્જલિઃ ।
પપ્રચ્છ સાધ્વહં વિપ્ર કથં વાઽસાધ્વહં મુને ।
કથં ચ કુષ્ઠં મે જાતમેતન્મે વક્તુમર્હસિ ॥ ૬૨.૨૦॥

વસિષ્ઠ ઉવાચ ।
એતદ્બ્રહ્મોદ્ભવં નામ પદ્મં ત્રૈલોક્યવિશ્રુતમ્ ।
દૃષ્ટમાત્રેણ ચાનેન દૃષ્ટાઃ સ્યુઃ સર્વદેવતાઃ ।
એતસ્મિન્ દૃશ્યતે ચૈતત્ ષણ્માસં ક્વાપિ પાર્થિવ ॥ ૬૨.૨૧॥

એતસ્મિન્ દૃષ્ટમાત્રે તુ યો જલં વિશતે નરઃ ।
સર્વપાપવિનિર્મુક્તઃ પરં નિર્વાણમર્હતિ ॥ ૬૨.૨૨॥

બ્રહ્મણઃ પ્રાગવસ્થાયા મૂર્તિરપ્સુ વ્યવસ્થિતા ।
એતાં દૃષ્ટ્વા જલે મગ્નઃ સંસારાદ્વિપ્રમુચ્યતે ॥ ૬૨.૨૩॥

ઇમં ચ દૃષ્ટ્વા તે સૂતો જલે મગ્નો નરોત્તમ ।
પ્રવિષ્ટશ્ચ પુનરિમં હર્તુમિચ્છન્નરાધિપ ।
પ્રાપ્તવાનસિ દુર્બુદ્ધે કુષ્ઠિત્વં પાપપૂરુષ ॥ ૬૨.૨૪॥

દૃષ્ટમેતત્ ત્વયા યસ્માત્ ત્વં સાધ્વિતિ તતઃ પ્રભો ।
મયોક્તો મોહમાપન્નસ્તેનાસાધુરિતીરિતઃ ॥ ૬૨.૨૫॥

બ્રહ્મપુત્રો હ્યહં ચેમં પશ્યામિ પરમેશ્વરમ્ ।
અહન્યહનિ ચાગચ્છંસ્તં પુનર્દૃષ્ટવાનસિ ॥ ૬૨.૨૬॥

દેવા અપિ વદન્ત્યેતે પદ્મં કાઞ્ચનમુત્તમમ્ ।
માનસે બ્રહ્મપદ્મં તુ દૃષ્ટ્વા ચાત્ર ગતં હરિમ્ ।
પ્રાપ્સ્યામસ્તત્ પરં બ્રહ્મ યદ્ગત્વા ન પુનર્ભવેત્ ॥ ૬૨.૨૭॥

ઇદં ચ કારણં ચાન્યત્ કુષ્ઠસ્ય શ઼ૃણુ પાર્થિવ ।
આદિત્યઃ પદ્મગર્ભેઽસ્મિન્ સ્વયમેવ વ્યવસ્થિતઃ ॥ ૬૨.૨૮॥

તં દૃષ્ટ્વા તત્ત્વતો ભાવઃ પરમાત્મૈષ શાશ્વતઃ ।
ધારયામિ શિરસ્યેનં લોકમધ્યે વિભૂષણમ્ ॥ ૬૨.૨૯॥

એવં તે જલ્પતા પાપમિદં દેવેન દર્શિતમ્ ।
ઇદાનીમિમમેવ ત્વમારાધય મહામતે ॥ ૬૨.૩૦॥

અગસ્ત્ય ઉવાચ ।
એવમુક્ત્વા વસિષ્ઠસ્તુ ઇમમેવ વ્રતં તદા ।
આદિત્યારાધનં દિવ્યમારોગ્યાખ્યં જગાદ હ ॥ ૬૨.૩૧॥

સોઽપિ રાજાઽકરોચ્ચેમં વ્રતં ભક્તિસમન્વિતઃ ।
સિદ્ધિં ચ પરમાં પ્રાપ્તો વિરોગશ્ચાભવત્ ક્ષણાત્ ॥ ૬૨.૩૨॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે દ્વિષષ્ટિતમોઽધ્યાયઃ ॥ ૬૨॥

## ત્રિષષ્ટિતમોઽધ્યાયઃ

અગસ્ત્ય ઉવાચ ।
અથાપરં મહારાજ પુત્રપ્રાપ્તિવ્રતં શુભમ્ ।
કથયામિ સમાસેન તન્મે નિગદતઃ શ ृણુ ॥ ૬૩.૧॥

માસે ભાદ્રપદે યા તુ કૃષ્ણપક્ષે નરેશ્વર ।
અષ્ટમ્યામુપવાસેન પુત્રપ્રાપ્તિવ્રતં હિ તત્ ॥ ૬૩.૨॥

ષષ્ઠ્યાં ચૈવ તુ સઙ્કલ્પ્ય સપ્તમ્યામર્ચયેદ્ધરિમ્ ।
દેવક્યુત્સઙ્ગગં દેવં માતૃભિઃ પરિવેષ્ટિતમ્ ॥ ૬૩.૩॥

પ્રભાતે વિમલેઽષ્ટમ્યામર્ચયેત્ પ્રયતો હરિમ્ ।
પ્રાગ્વિધાનેન ગોવિન્દમર્ચયિત્વા વિધાનતઃ ॥ ૬૩.૪॥

તતો યવૈઃ કૃષ્ણતિલૈઃ સઘૃતૈર્હોમયેદ્દ્વિધિ ।
બ્રાહ્મણાન્ ભોજયેદ્ભક્ત્યા યથાશક્ત્યા સદક્ષિણાન્ ॥ ૬૩.૫॥

તતઃ સ્વયં તુ ભુઞ્જીત પ્રથમં બિલ્વમુત્તમમ્ ।
પશ્ચાદ્યથેષ્ટં ભુઞ્જીત સ્નેહૈઃ સર્વરસૈર્યુતમ્ ॥ ૬૩.૬॥

પ્રતિમાસમનેનૈવ વિધિનોપોષ્ય માનવઃ ।
કૃષ્ણાષ્ટમીમપુત્રોઽપિ લભેત્ પુત્રં ન સંશયઃ ॥ ૬૩.૭॥

શ્રૂયતે ચ પુરા રાજા શૂરસેનઃ પ્રતાપવાન્ ।
સ હ્યપુત્રસ્તપસ્તેપે હિમવત્પર્વતોત્તમે ॥ ૬૩.૮॥

તસ્યૈવં કુર્વતો દેવો વ્રતમેતજ્જગાદ હ ।

સોઽપ્યેતત્ કૃતવાન્ રાજા પુત્રં ચૈવોપલબ્ધવાન્ ॥ ૬૩.૯॥

વસુદેવં મહાભાગમનેકક્રતુયાજિનમ્ ।
તં લબ્ધ્વા સોઽપિ રાજર્ષિઃ પરં નિર્વાણમાપત્વાન્ ॥ ૬૩.૧૦॥

એવં કૃષ્ણાષ્ટમી રાજન્ મયા તે પરિકીર્તિતા ।
સંવત્સરાન્તે દાતવ્યં કૃષ્ણયુગ્મં દ્વિજાતયે ॥ ૬૩.૧૧॥

એતત્ પુત્રવ્રતં નામ મયા તે પરિકીર્તિતમ્ ।
એતત્ કૃત્વા નરઃ પાપૈઃ સર્વૈરેવ પ્રમુચ્યતે ॥ ૬૩.૧૨॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે ત્રિષષ્ટિતમોઽધ્યાયઃ ॥ ૬૩॥

## ચતુઃષ્ટિતમોઽધ્યાયઃ ।

અગસ્ત્ય ઉવાચ ।
અથાપરં પ્રવક્ષ્યામિ શૌર્યવ્રતમનુત્તમમ્ ।
યેન ભીરોરપિ મહચ્છૌર્યં ભવતિ તત્ક્ષણાત્ ॥ ૬૪.૧॥

માસિ ચાશ્વયુજે શુદ્ધાં નવમીં સમુપોષયેત્ ।
સપ્તમ્યાં કૃતસઙ્કલ્પઃ સ્થિત્વાઽષ્ટમ્યાં નિરોદનઃ ॥ ૬૪.૨॥

નવમ્યાં પારયેત્ પિષ્ટં પ્રથમં ભક્તિતો નૃપ ।
બ્રાહ્મણાન્ ભોજયેદ્ભક્ત્યા દેવીં ચૈવ તુ પૂજયેત્ ।
દુર્ગાં દેવીં મહાભાગાં મહામાયાં મહાપ્રભામ્ ॥ ૬૪.૩॥

એવં સંવત્સરં યાવદુપોષ્યેતિ વિધાનતઃ ।
વ્રતાન્તે ભોજયેદ્ધીમાન્ યથાશક્ત્યા કુમારિકાઃ ॥ ૬૪.૪॥

હેમવસ્ત્રાદિભિસ્તાસ્તુ ભૂષયિત્વા તુ શક્તિતઃ ।
પશ્ચાત્ ક્ષમાપયેત્ તાસ્તુ દેવી મે પ્રીયતામિતિ ॥ ૬૪.૫॥

એવં કૃતે ભ્રષ્ટરાજ્યો લભેદ્રાજ્યં ન સંશયઃ ।
અવિદ્યો લભતે વિદ્યાં ભીતઃ શૌર્યં ચ વિદન્તિ ॥ ૬૪.૬॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે ચતુઃષષ્ટિતમોઽધ્યાયઃ ॥ ૬૪॥

## પઞ્ચષષ્ટિતમોઽધ્યાયઃ ।

અગસ્ત્ય ઉવાચ ।
સાર્વભૌમવ્રતં ચાન્યત્ કથયામિ સમાસતઃ ।
યેન સમ્યક્કૃતેનાશુ સાર્વભૌમો નૃપો ભવેત્ ॥ ૬૫.૧॥

કાર્તિકસ્ય તુ માસસ્ય દશમી શુક્લપક્ષિકા ।
તસ્યાં નક્તાશનો નિત્યં દિક્ષુ શુદ્ધબલિં હરેત્ ॥ ૬૫.૨॥

વિચિત્રૈઃ કુસુમૈર્ભક્ત્યા પૂજયિત્વા દ્વિજોત્તમાન્ ।
દિશાં તુ પ્રાર્થનાં કુર્યાન્મન્ત્રેણાનેન સુવ્રતઃ ।
સર્વા ભવત્યઃ સિદ્ધ્યન્તુ મમ જન્મનિ જન્મનિ ॥ ૬૫.૩॥

એવમુક્ત્વા બલિં તાસુ દત્ત્વા શુદ્ધેન ચેતસા ।
તતો રાત્રૌ તુ ભુઞ્જીત દધ્યન્નં તુ સુસંસ્કૃતમ્ ॥ ૬૫.૪॥

પૂર્વં પશ્ચાદ્યથેષ્ટં તુ એવં સંવત્સરં નૃપ ।
યઃ કરોતિ નરો નિત્યં તસ્ય દિગ્વિજયો ભવેત્ ॥ ૬૫.૫॥

એકાદશ્યાં તુ યત્નેન નરઃ કુર્યાદ્યથાવિધિ ।
માર્ગશીર્ષે શુક્લપક્ષાદારભ્યાબ્દં વિચક્ષણઃ ।
તદ્વ્રતં ધનદસ્યેષ્ટં કૃતં વિત્તં પ્રયચ્છતિ ॥ ૬૫.૬॥

એકાદશ્યાં નિરાહારો યો ભુઙ્ક્તે દ્વાદશીદિને ।
શુક્લે વાઽપ્યથવા કૃષ્ણે તદ્વ્રતં વૈષ્ણવં મહત્ ॥ ૬૫.૭॥

એવં ચીર્ણં સુઘોરાણિ હન્તિ પાપાનિ પાર્થિવ ।
ત્રયોદશ્યાં તુ નક્તેન ધર્મવ્રતમથોચ્યતે ॥ ૬૫.૮॥

શુક્લપક્ષે ફાલ્ગુનસ્ય તથારભ્ય વિચક્ષણઃ ।
રૌદ્રં વ્રતં ચતુર્દશ્યાં કૃષ્ણપક્ષે વિશેષતઃ ।
માઘમાસાદથારભ્ય પૂર્ણં સંવત્સરં નૃપ ॥ ૬૫.૯॥

ઇન્દુવ્રતં પઞ્ચદશ્યાં શુક્લાયાં નક્તભોજનમ્ ।
પિતૃવ્રતમમાવાસ્યામિતિ રાજન્ તથેરિતમ્ ॥ ૬૫.૧૦॥

દશ પઞ્ચ ચ વર્ષાણિ ય એવં કુરુતે નૃપ ।
તિથિવ્રતાનિ કસ્તસ્ય ફલં વ્રતપ્રમાણતઃ ॥ ૬૫.૧૧॥

અશ્વમેધસહસ્રાણિ રાજસૂયશતાનિ ચ ।

યષ્ટાનિ તેન રાજેન્દ્ર કલ્પોક્તાઃ ક્રતવસ્તથા ॥ ૬૫.૧૨॥

એકમેવ કૃતં હન્તિ વ્રતં પાપાનિ નિત્યશઃ ।
યઃ પુનઃ સર્વમેતદ્ધિ કુર્યાન્નરવરાત્મજ ।
સ શુદ્ધો વિરજો લોકાનાપ્નોતિ સકલં નૃપ ॥ ૬૫.૧૩॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે પઞ્ચષષ્ટિતમોઽધ્યાયઃ ॥ ૬૫॥

## ષટ્ષષ્ટિતમોઽધ્યાયઃ

ભદ્રાશ્વ ઉવાચ ।
આશ્ચર્યં યદિ તે કિઞ્ચિદ્વિદિતં દૃષ્ટમેવ વા ।
તન્મે કથય ધર્મજ્ઞ મમ કૌતૂહલં મહત્ ॥ ૬૬.૧॥

અગસ્ત્ય ઉવાચ ।
આશ્ચર્યભૂતો ભગવાનેષ એવ જનાર્દનઃ ।
તસ્યાશ્ચર્યાણિ દૃષ્ટાનિ બહૂનિ વિવિધાનિ વૈ ॥ ૬૬.૨॥

શ્વેતદ્વીપં ગતઃ પૂર્વં નારદઃ કિલ પાર્થિવ ।
સોઽપશ્યચ્છઙ્ખચક્રાબ્જાન્ પુરુષાંસ્તિગ્મતેજસઃ ॥ ૬૬.૩॥

અયં વિષ્ણુરયં વિષ્ણુરેષ વિષ્ણુઃ સનાતનઃ ।
ચિન્તાઽભૂત્તસ્યતાન્દૃષ્ટ્વા કોઽસ્મિન્વિષ્ણુરિતિ પ્રભુઃ ॥ ૬૬.૪॥

એવં ચિન્તયતસ્તસ્ય ચિન્તા કૃષ્ણં પ્રતિ પ્રભો ।
આરાધયામિ ચ કથં શઙ્ખચક્રગદાધરમ્ ॥ ૬૬.૫॥

યેન વેદ્મિ પરં તેષાં દેવો નારાયણઃ પ્રભુઃ ।
એવં સઞ્ચિન્ત્ય દધ્યૌ સ તં દેવં પરમેશ્વરમ્ ॥ ૬૬.૬॥

દિવ્યં વર્ષસહસ્રં તુ સાગ્રં બ્રહ્મસુતસ્તદા ।
ધ્યાયતસ્તસ્ય દેવોઽસૌ પરિતોષં જગામ હ ॥ ૬૬.૭॥

ઉવાચ ચ પ્રસન્નાત્મા પ્રત્યક્ષત્વં ગતઃ પ્રભુઃ ।
વરં બ્રહ્મસુત બ્રૂહિ કિં તે દદ્મિ મહામુને ॥ ૬૬.૮॥

નારદ ઉવાચ ।
સહસ્રમેકં વર્ષાણાં ધ્યાતસ્ત્વં ભુવનેશ્વર ।
ત્વત્પ્રાપ્તિર્યેન તદ્બ્રૂહિ યદિ તુષ્ટોઽસિ મેઽચ્યુત ॥ ૬૬.૯॥

દેવદેવ ઉવાચ ।
પૌરુષં સૂક્તમાસ્થાય યે યજન્તિ દ્વિજાસ્તુ મામ્ ।
સંહિતામાદ્યમાસ્થાય તે માં પ્રાપ્સ્યન્તિ નારદ ॥ ૬૬.૧૦॥

અલાભે વેદશાસ્ત્રાણાં પઞ્ચરાત્રોદિતેન હ ।
માર્ગેણ માં પ્રપશ્યન્તે તે માં પ્રાપ્સ્યન્તિ માનવાઃ ॥ ૬૬.૧૧॥

બ્રાહ્મણક્ષત્રિયવિશાં પઞ્ચરાત્રં વિધીયતે ।
શૂદ્રાદીનાં ન તચ્છ્રોત્રપદવીમુપયાસ્યતિ ॥ ૬૬.૧૨॥

એવં મયોક્તં વિપ્રેન્દ્ર પુરાકલ્પે પુરાતનમ્ ।
પઞ્ચરાત્રં સહસ્રાણાં યદિ કશ્ચિદ્ગ્રહીષ્યતિ ॥ ૬૬.૧૩॥

કર્મક્ષયે ચ માં કશ્ચિદ્યદિ ભક્તો ભવિષ્યતિ ।
તસ્ય ચેદં પઞ્ચરાત્રં નિત્યં હૃદિ વસિષ્યતિ ॥ ૬૬.૧૪॥

ઇતરે રાજસૈર્ભાવૈસ્તામસૈશ્ચ સમાવૃતાઃ ।
ભવિષ્યન્તિ દ્વિજશ્રેષ્ઠ મચ્છાસનપરાઙ્મુખાઃ ॥ ૬૬.૧૫॥

કૃતં ત્રેતા દ્વાપરં ચ યુગાનિ ત્રીણિ નારદ ।
સત્ત્વસ્થાં માં સમેષ્યન્તિ કલૌ રજસ્તમોઽધિકાઃ ॥ ૬૬.૧૬॥

અન્યચ્ચ તે વરં દદ્મિ શ ૃણુ નારદ સામ્પ્રતમ્ ।
યદિદં પઞ્ચરાત્રં મે શાસ્ત્રં પરમદુર્લભમ્ ।
તદ્ભવાન્ વેત્સ્યતે સર્વં મત્પ્રસાદાન્ન સંશયઃ ॥ ૬૬.૧૭॥

વેદેન પઞ્ચરાત્રેણ ભક્ત્યા યજ્ઞેન ચ દ્વિજ ।
પ્રાપ્યોઽહં નાન્યથા વત્સ વર્ષકોટ્યાયુતૈરપિ ॥ ૬૬.૧૮॥

એવમુક્ત્વા સ ભગવાન્ નારદં પરમેશ્વરઃ ।
જગામાદર્શનં સદ્યો નારદોઽપિ યયૌ દિવમ્ ॥ ૬૬.૧૯॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે ષટ્ષષ્ટિતમોઽધ્યાયઃ ॥ ૬૬॥

સેપ્તિઓન્સપ્તષષ્ટિતમોઽધ્યાયઃ

ભદ્રાશ્વ ઉવાચ ।
ભગવન્ સિતકૃષ્ણે દ્વે ભિન્ને જગતિ કેશવાન્ ।
સ્ત્રિયૌ બભૂવતુઃ કે દ્વે સિતકૃષ્ણા ચ કા શુભા ॥ ૬૭.૧॥

કશ્ચાસૌ પુરુષો બ્રહ્મન્ ય એકઃ સપ્તધા ભવેત્ ।

કોઽસૌ દ્વાદશધા વિપ્ર દ્વિદેહઃ ષટ્શિરાઃ શુભઃ ॥ ૬૭.૨॥

દમ્પત્યં ચ દ્વિજશ્રેષ્ઠ કૃતસૂર્યોદયાદનમ્ ।
કસ્માદેતજ્જગદિદં વિતતં દ્વિજસત્તમ ॥ ૬૭.૩॥

અગસ્ત્ય ઉવાચ ।
સિતકૃષ્ણે સ્ત્રિયૌ યે તે તે ભગિન્યૌ પ્રકીર્તિતે ।
સત્યાસત્યે દ્વિવર્ણા ચ નારી રાત્રિરુદાહૃતા ॥ ૬૭.૪॥

યઃ પુમાન્ સપ્તધા જાત એકો ભૂત્વા નરેશ્વર ।
સ સમુદ્રસ્તુ વિજ્ઞેયઃ સપ્તધૈકો વ્યવસ્થિતઃ ॥ ૬૭.૫॥

યોઽસૌ દ્વાદશધા રાજન્ દ્વિદેહઃ ષટ્શિરાઃ પ્રભુઃ ।
સંવત્સરઃ સ વિજ્ઞેયઃ શરીરે દ્વે ગતી સ્મૃતે ।
ઋતવઃ ષટ્ ચ વક્ત્રાણિ એષ સંવત્સરઃ સ્મૃતઃ ॥ ૬૭.૬॥

દમ્પત્યં તદહોરાત્રં સૂર્યાચન્દ્રમસૌ તતઃ ।
તતો જગત્ સમુત્તસ્થૌ દેવસ્યાસ્ય નૃપોત્તમ ॥ ૬૭.૭॥

સ વિષ્ણુઃ પરમો દેવો વિજ્ઞેયો નૃપસત્તમ ।
ન ચ વેદક્રિયાહીનઃ પશ્યતે પરમેશ્વરમ્ ॥ ૬૭.૮॥

॥ ઇતિ વરાહપુરાણે ભગવચ્છાસ્ત્રે સપ્તષષ્ટિતમોઽધ્યાયઃ ॥ ૬૭॥

ઇતિ શ્રીઅગસ્ત્યગીતા સમાપ્તા ।

Varahapurana adhyAya 51-67
There are quite a few variations in printed books.

Proofread by PSA Easwaran

*Agastya Gita*
pdf was typeset on June 26, 2022

Please send corrections to *sanskrit@cheerful.com*